# E-CONTENT

Prepared by


**MRS. PAMPA GHORUI**

**State Aided College Teacher**

**Department of Sanskrit**

**BARJORA COLLEGE**

**NAAC ACCREDITED 'B'**

**Affiliated to the Bankura University**

**Barjora, Bankura, West Bengal, Pin-722202**

**Estd. – 1985**


## E-CONTENT FOR

**Semester:** 5th Semester

**Students:** Sanskrit Honours

**Course Code:** AHSNS 502C-12

**Course Title:** Indian Epigraphy, Palaeography and Chronology

## TOPIC OF THE E-CONTENT

**॥ प्राचीनभारतीय इतिहासनिर्माणे तथा संस्कृतेः पुनर्निर्माणे अभिलेखशास्त्रस्य महत्त्वम् ॥**

**(Prachinabharatiya Itihasanirmane Tatha Sanskruteh Punarnirmane Abhilekhashastrasya Mahattvam)**

भारतीयमैतिह्यं नाना विधम्, वैदिकमैतिह्यं, मध्यकालिकमैतिह्यमाधुनिकञ्च । इतोऽपि नाना धर्मकर्माचारपद्धत्या बहवः संस्कारास्सन्ति तां परम्परां स्मर्तुं अभिलेखविधिरपि कार्यं करोति । तत्र प्राचीनभारतीयैतिह्यस्य संस्कृतेश्च प्रमुखस्रोतरूपेषु अभिलेखस्मारकमुद्रादीनामपि महत्त्वपूर्णं स्थानं विद्यते । इदानीं प्राचीनभारतीय इतिहासनिर्माणे तथा संस्कृतेः पुनर्निर्माणे अभिलेखशास्त्रस्य महत्त्वम् समासेन आलोच्यन्ते-

<u>राज्ञां विजयवर्णनम्</u>- रूद्रदान: गिरनाराभिलेखे (१५० ईस्वी) स्पष्टरूपेणोल्लिखितमस्ति यत् रूद्रदामा यौधेयानामुत्सादनं कृतवान् । उत्कणितान-सान्त-वन नाम ऐतिह्यानमा राज्ञां विजयवर्णनम् - रूद्रदाम्न: गिरनाराभिलेखे (१५० ईस्वी) स्पष्टरूपेणोल्लिखितमस्ति यत् रूद्रदामा यौधेयानामुत्सादनं कृतवान् । दक्षिणाधिपतिं शातकर्णिमहोदयं वारद्वयं विजित्य मुक्तं कृतवान् । समुद्रगुप्तस्य प्रयागप्रशस्तिमध्ये समुद्रगुप्तस्य दिग्विजयस्य वर्णनं विस्तारेण कृतमस्ति । विदुषां मते चन्द्रस्य मेहरौलीलौहस्तम्भाभिलेखस्य विजयस्तम्भरूपेण स्वीकृतमस्ति ।

<u>शासनप्रबन्धनम्</u>- अशोकस्य शासनकाले राजाप्रजानाञ्च सम्बन्धः पितापुत्रवदासीत् । अशोकः स्वकीयं शासनसूत्रं स्वहस्ते एव नियन्त्रितं कृतवान् । राजा अशोकः जनकल्याणार्थं वृक्षारोपणं, तडागं, कूपनिर्माणं, औषधिव्यवस्थां च कारितवान् । मनुष्यपशुनिमित्तं चिकित्साव्यवस्थां च कृतवान्। अशोकराज्ये महामात्रः, धर्ममहामात्रः, राजुकः, प्रादेशिकः इत्याख्यानामधिकारिणां च नियोगः भवति स्म । गुप्तसाम्राज्यं नाना प्रान्तेषु विभक्तमासीत् । प्रान्तीयाः शासनकाः राष्ट्रिक, भौगिकः, भोगपतिः गोप्तादयः नाम्ना प्रसिद्धा आसन् ।

<u>तिथिक्रमकालक्रमयोश्च निर्धारणम्</u>- अयं विषय इतिहासस्य अभिन्नभूतम् अङ्गमस्ति । ऐतिह्यनिर्माणे अभिलेखेषूल्लिखिताः तिथयः संवत्सर रूपेणोपयोगिन अभवन् । महाकविकालिदासभारव्योश्च कालनिर्धारणप्रसङ्गे पुलकेशिन्-द्वितीयस्य ऐहोलाभिलेखे

(६३४ईस्वी) लिखिता या तिथि: सा प्रामाणिकीति प्रतिभाति । कृत्संवत्सरः, मालवसंवत्सरः, विक्रमसंवत्सरः, शकसंवत्सरः, (वलभीसंवत्सरः) गुप्तसंवत्सरः, हर्षसंवत्सरः, इत्यादीनामुल्लेख : ऐतिह्यनिर्माणे सहायकाः भवन्ति ।

**सामाजिकं चित्रणम्-** सम्राट् अशोकस्याभिलेखेषु सामूहिकपरिवारप्रणाली दृग्गोचरी भवति । वर्णाश्रमधर्मस्य प्रसङ्गे ब्राह्मणस्य सम्बन्धः दानेन, क्षत्रियाणां शासनेन, वैश्यानां व्यापारकृषिपशुपालनादिना शूद्राणां च सेवया वर्णनं कृतमस्ति। तत्र वर्णनक्रमे कायस्थादीनां जातीनामपि वर्णनं कृतमस्ति । अशोकः स्वकीये नवमशिलाभिलेखे दासेन सेवकेन च साकं सम्यग्व्यवहारस्योपदेशं दत्तवान् । राज्ञः विवाहप्रसङ्गे नानाविवाहवर्णनमपि मिलति । मनोरञ्जनसाधनेषु मृगया, संगीतम्, द्यूतक्रीडा इत्यादीनि आसन् ।

**आर्थिकी अवस्था-** अभिलेखेषु वर्णितानां भूमिदानं, ग्रामदानं, कूपनिर्माणम् सरोवरनिर्माणं ताम्रपट्टादिप्रयोगकरणं तात्कालिकीमुच्चार्थिकव्यवस्थां ज्ञापयति । आर्थिकस्थितेः सुदृढकारणादेव रूद्रदामा प्रजाभ्यः करग्रहणं उपहारग्रहणं
च न कृतवान् । स्वराजकोषादेव उत्कृष्टं बन्धनिर्माणं कारितवान् । नालंदा-ताम्रपत्रे भोजनस्य उच्चस्तरं दर्शितमस्ति । यथा सम्यग् बहुघृत-बहुदधिभिः व्यञ्जनैः युक्तमन्नम् । रूद्रदामा (१५० ईस्वी) तथा स्कन्दगुप्तः (प्राय: ४५५ ४६७ईस्वी) इत्यनयोः तिथिविहीनाः गिरनाराभिलेखाः बोधयन्ति यत् मौर्यचन्द्रगुप्तद्वारा निर्मितस्य अशोकद्वारा प्रणालिकयादिभिः संवर्धितस्य सुदर्शनसरोवरस्य रूद्रदामास्कन्धगुप्तौ पुनः संस्कारं कारितवन्तौ ।

**धार्मिकी अवस्था-** अभिलेखेषु नाना धर्माणां सम्प्रदायानाञ्चोल्लेखः प्राप्यते । अशोकस्याभिलेखेषु ब्राह्मणश्रमणाजीवकानां धार्मिकसम्प्रदायानां प्रचलनमासीत् । अशोकः राष्ट्रधर्मेण सह वैयक्तिकजीवनेऽपि बौद्धधर्मं स्वीकृतवान् । धार्मिकस्वतन्त्रतायाः अतीवमनोहारिचित्रणमभिलेखेभ्य ज्ञायते परिलक्षितश्च भवति ।

**भौगोलिक स्थितिः**- अभिलेखेषु विभिन्नानां नगराणां पर्वतानां नदीनाञ्च स्थितेः वर्णनं कृतमस्ति । राज्ञां यात्रामार्गाः, राज्यविस्तारः, सीमानाञ्च विस्तारादीनामुल्लेखप्रसङ्गे प्रतिपादितं वर्णनं ऐतिह्यनिर्माणं पाषाणवत् कार्यं करोति । यथा अशोकस्य साम्राज्यविस्तारः पूर्वस्मिन् बङ्गादारभ्य उत्तरस्यां हिन्दुकुशपर्यन्तं ततोऽपि हिमालयादारभ्य दक्षिणदिशि मैसूरस्य दक्षिणीभागचित्तलदुर्गपर्यन्तं विस्तृतमासीत्

**साहित्यिकं महत्त्वम्**- मोक्षमूलरः (मैक्समूलरः) कल्पयति यत् ईसायाः प्रारम्भिकशताब्दी संस्कृतसाहित्यस्य कृते अन्धकारपूर्णा आसीत् । परन्तु मैक्समूलरमहोदयस्य अस्याः भ्रान्तेः निराकरणं रूद्रदाम्नः (१५० ईस्वी) गिरनाराभिलेखस्य प्रकाशान्तर्गते सति जातम् । संस्कृतगद्यस्य उत्कृष्टोदाहरणस्वरूपेऽस्मिन्नभिलेखे अलङ्कारस्य रीतेः तथा गद्यसौन्दर्यविधायकानां समेषां गुणानां प्रयोगः प्रयुक्तोऽस्ति । यथा स्फुट-लघु-मधुर-चित्र-कान्त-शब्द-समयोदारलंकृतं गद्यपद्यम्...... ।

समुद्रगुप्तस्य एरणस्तम्भाभिलेखे वसंततिलकाच्छन्दसि तथा चन्द्रस्य महरौलीलौहस्तम्भाभिलेखे शार्दूलविक्रीडितछन्दसि श्लोकः निबद्धोऽस्ति । मन्दसौरस्य पट्टवायश्रेणि-अभिलेखः चतुश्चत्वारिंशत् श्लोकानां एकं सुन्दरं लघुकाव्यमस्ति । अभिलेखेभ्यः हरिषेणः, वत्सभट्टिः, रविकीर्तिःइत्यादीनां कवीनां नामानि प्रकाशे आगच्छन्ति। चाहमानवंशीविग्रहराजकालीनः सोमदेवरचितं ललितविग्रहनाटकं, विग्रहराजकृतं हरिकेलिनाटकं च प्रस्तरशिलांकितं नाट्यं नाट्यसाहित्यस्य सुन्दरमुदाहरणमस्ति । यदि अभिलेखस्मारकमुद्रादीनां पुरातत्ववेत्तारः अन्वेषणं न कृतवन्तः स्युः तदा भारतराष्ट्रं स्वातीतस्य गौरवं न प्राप्नुयात् । उपरोक्तानि समस्तान्यपि तथ्यानि प्राचीनभारतस्य ऐतिह्यसंस्कृत्योश्च निर्माणे सहायकान्यभवन् इति शम् ।